**अन्वेषणा** वर्ष:- ३, अङ्क:-३, २०८२ सत्यापिता, विज्ञसमीक्षिता, नेप्जोल-सुचीकृता पत्रिका (जर्नल) ISSN:-3021-9485(P)

# विषयविवेचनदृष्ट्या व्याकरणशास्त्रस्यानुशीलनम्

**नवराजपाण्डेयः**
**प्राध्यापकः,**
**नेपाल–संस्कृत–विश्वविद्यालयः**
**विश्वविद्यालयविद्यापीठम्**
**बेलझुण्डी,दाङ्**
**navrajpandey048@gmail.com**
**९८४७११५७१९**

## सारसङ्क्षेपः

प्रस्तुतेऽस्मिन्नालेखे सुरभारत्याः शब्दसाधुत्वनिष्पादनव्यवस्थायां व्याकरणशास्त्रे कीदृशी प्रक्रियाऽवलम्बिता ? कानि च शब्दसाधुत्वनिष्पादकानि तत्त्वानि ? पदत्वनिष्पादनं कथम् ? पदानां संयोजनेन वाक्यनिर्माणप्रक्रिया च कीदृशी ? इत्यादिबहुविधजिज्ञासापरिपूर्त्यर्थं पुस्तकालयीयविधिमवलम्ब्य समुपलब्धानां सामग्रीणां समुचितप्रयोगपूर्वकं विश्लेषणात्मकाध्ययनस्य प्रयासो विहितो वर्तते । शब्दसाधुत्वनिष्पादकेन सूत्रात्मकविधिना विश्वस्मिन् विद्यमानानां व्याकरणानां मध्ये पाणिनीयव्याकरणे मुख्यतः के के ? विषयाः प्रतिपादिताः इति तथ्यं प्रस्तोतुं वर्णानामुत्पत्तिस्थानप्रयत्नादिवर्गीकरणं तिङन्तकृदन्ततद्धितान्तसमस्तपदनिष्पादनप्रक्रिया सन्धिद्वारा पदनिष्पत्तिप्रक्रिया तथा सविश्लेषणं कारकीयप्रक्रियया वाक्यनिर्माणविधिश्चात्र प्रदर्शितो वर्तते ।
वाग्व्यवहारे प्रयुज्यमानपदानां बाह्याभ्यन्तरतत्वविवेचनपूर्वकं वैयाकरणानां स्फोटसिद्धान्तचिन्तनप्रक्रमे परादिचतुर्विधवाचां वर्गीकरणं विधाय व्याकरणस्य प्रमुखविवेच्यविषयाः निर्दिष्टा विद्यन्ते । निष्कर्षेणानेन व्याकरणस्य विषयविवेचनेऽध्येतृणां सौकर्यं भविष्यतीति मे विश्वासः ।)

**विशेषशब्दावली**: सुरभारती, डमरुध्वनेः, वर्णसमाम्नायम्, आलोड्य, ईषद्विवृतः, विवृतः, वाक्तत्त्वम् ।

## विषयपरिचयः

संस्कृतभाषा विश्वस्य सर्वप्राचीना सृष्टिकालिकी देवभाषा वेदभाषा च अस्ति । तस्याः पूर्णरूपेण ज्ञानाय बोधनाय तद्व्यवस्थापनाय च पाणिनीयं व्याकरणमेव समर्थमस्ति । यद्यपि पूर्वाचार्यैस्तद्विषये पाणिनेः पूर्वमेव बहवो ग्रन्था निर्मिताः सन्ति, तथापि ते शब्दसाधुत्वव्यवस्थायां पूर्णतां न भजन्ते । ते तु पाणिनीयव्याकरणस्योदयानन्तरं लुप्तप्राया इव जाताः । अत एव पाणिनीयं व्याकरणं भाषातत्त्वस्य मूलभूतवर्णपदवाक्यादीनां विश्लेषणपूर्वकं पदसाधुत्वसम्पादने अन्यग्रन्थेभ्यो विशेषस्थानं भजते । अतस्तस्य विषयविवेचनमस्याऽऽलेखस्य प्रयोजनमस्ति ।

## अध्ययनविधिः

पुस्तकालयीयविधिमवलम्ब्य चेदं व्याकरणशास्त्रस्य विषयविवेचनात्मकमध्ययनं विहितम् । अत्र पाणिनीयव्याकरणपरम्परायां प्रचलिताः ग्रन्थाः शब्दसाधुत्वनिष्पादका अन्ये ग्रन्थाश्चाध्ययने प्रमुखसामग्रीत्वेन अवलम्बिता विद्यन्ते । व्याकरणशास्त्रस्य ग्रन्थानां विवेचनपूर्वकं निष्कर्षरूपेण च पाणिनीयव्याकरणस्य विषयाः

संक्षेपेणेह प्रस्तूयन्ते।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

पाणिनीयव्याकरणस्य विषयविवेचनप्रसंगे तत्परम्परायां प्रचलिताः शब्दसाधुत्वनिष्पादकाः तद्व्याख्यानभूता दार्शनिकविषयप्रतिपादकाः ग्रन्थाश्च अस्यानुसन्धानात्मकाऽऽलेखस्य मुख्यं क्षेत्रं सीमा च सन्ति।

## विषयप्रवेशः

ब्रह्माण्डेऽस्मिन्नादौ समुद्भूतं मानवीयमैश्वर्यं ईश्वरप्रदत्ता वेदा एव। तत्रत्या भाषा हि अद्यतनेऽर्वाचीने वैज्ञानिके युगेऽपि प्रयुज्यमानानां सर्वासां भाषाणां मूलं संस्कृतभाषा एव वर्तते। संस्कृतभाषा अद्यतनप्रयुज्यमानानां सर्वाधिकभाषाणां जननी अस्ति। भाषापारम्पर्यस्य पर्यवेक्षणेन अनुभूयते यद् वक्तृवैविध्येन देशकालगतपार्थक्येन च भाषा परिवर्तिता भवति। अत एव वैदिकभाषातः लौकिकभाषा पृथग्रूपा इव दृश्यते। तत्रापि कालभेदात् कर्तृभेदाच्च रामायणमहाभारतपुराणादिग्रन्थानां भाषाशैली सूक्ष्मरूपेण भिन्ना इव दृश्यते। ततोऽपि दार्शनिकग्रन्थानां श्रीमद्भागवतादि प्रौढपाण्डित्यपूर्णग्रन्थानां भाषाशैली पूर्वतो वैशिष्ट्यं भजते। संस्कृतवाङ्मयस्य प्रथमा ऋग्वेदकालिकी वैदिकी संस्कृतभाषा एव देशकालप्रयोगव्यवहारादीनां पार्थक्येन रामायणमहाभारतपुराणादिग्रन्थेषु प्रयुज्यमाना पाणिनेः समयपर्यन्तमागच्छन्ती क्वचिद् भेदवतीव प्रतीयते। वाग्व्यवहारेषु प्रवहन्त्या देवभाषाया अपभ्रंशरूपेण प्राकृतपालीमागधीहिन्दीनेपाल्यादयो बहुविधा भाषा जाताः। ब्रह्माण्डस्य रचयिता ईश्वर अस्य विश्वस्य सृष्टिस्थितिसंहारकार्यव्यवस्थापनाय स्वाभिप्रायबोधनाय च प्रथममन्तर्बहिःप्रकाशिकां ज्योतिःस्वरूपां देवभाषां विनिर्ममे। यदि भाषात्मकं ज्योतिर्भगवता निर्मितं न स्यात् तर्हि इदं जगत् अन्धकारमयं भवेत्। तथा हि–

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥ (दण्डी,काव्यदर्शः १।४)।

अत एव सांसारिकव्यवहारसञ्चालनाय परं ब्रह्म एव शब्दब्रह्मत्वेन विवर्तित इति दार्शनिकानां दृष्टिः संगच्छते -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ (भर्तृहरिः १९८७,श्लो. १)।

पुरा अनेके भाषाविद ऋषयो महर्षयश्च वैदिकवाङ्मयस्य बोधनाय वैदिकव्याकरणरूपेण प्रातिशाख्यं निर्ममिरे। केचन मुनयो लौकिकभाषायाः बोधाय तस्या यथावत् स्थिरीकरणाय च विविधानि लौकिकव्याकरणानि निर्ममिरे। प्रयोगभेदेन लौकिकवैदिकरूपायाः संस्कृतभाषायाः संरक्षणाय पाणिनिरष्टाध्यायीनामकं सूत्रात्मकं व्याकरणस्य ग्रन्थं रचयामास। तथैव कात्यायनो वार्तिकग्रन्थं रचयामास। महामुनिः पतञ्जलिश्च व्याकरणस्य व्याख्यानभूतं उच्चतमं महाभाष्यग्रन्थमरीरचत्। एतत्त्रिमुनिकृत्यसमुदितं त्रिमुनिव्याकरणत्वेन प्रसिद्धं पाणिनीयं व्याकरणमन्यशास्त्रेषु सर्वश्रेष्ठस्थानं भजते। पाणिनीयं व्याकरणं वागनुशासनविषये वर्णव्यवस्थायां पदव्यवस्थायां वाक्यविवेचनप्रसङ्गे च यादृशं सूक्ष्मविश्लेषणं विदधाति न तथा अन्यभाषाव्यवस्थापकव्याकरणेषु सूक्ष्मेक्षिका दृश्यते। अत एव सर्वे भाषाविदः वैयाकरणाश्च पाणिनेर्वर्णव्यवस्थादिसूक्ष्मेक्षिकाया भूरि भूरि प्रशंसां कुर्वन्तः प्रमाणत्वेन शिरोधारयन्ति।

विक्रमाब्दात् २९०० वर्षपूर्वं (त्रिपाठीः, १९८४) पाणिनिकाले प्रचलिता यादृशी परिष्कृता लौकिकी

संस्कृतभाषा आसीत् तां व्यवस्थाप्य वैज्ञानिकरूपेण परिष्कृत्य च अनन्तकालपर्यन्तं यथावद्रूपेण स्थापयितुं सूत्रात्मकशैल्या पाणिनिः नियमबद्धं व्यदधात्। एतादृशमपूर्वं कृत्यमपरैरतुलनीयमिति विपश्चितो मन्यन्ते। संस्कृतवाङ्मये प्रसिद्धानि सांख्ययोगमीमांसान्यायवेदान्तादीनि दर्शनशास्त्राणि शाकटायनादिरचितानि व्याकरणशास्त्राणि कालिदासमाघश्रीहर्षभारविदण्डिबाणप्रभृतिभिर्विरचितानि विविधकाव्यानि शङ्कराचार्यसायणशावररामानुजादिभिः निर्मितान् भाष्यटीकादिग्रन्थान् कोशवैद्यकादीनि बहुविधशास्त्राणि च पाणिनीयव्याकरणं शिरसि निधायैव रचितानि दृश्यन्ते। यतः संस्कृतवाङ्मयं पाणिनीयव्याकरणनियमबद्धं जातम्। महामुनिः पाणिनिर्हिमालयस्य निकटे नेपालस्य अर्घाखाँचीमण्डलान्तर्गते पर्वतशिखरे सिद्धतपःस्थले भगवतः शिवस्य तपश्चकार। तत्पश्चात् स पर्वतः पाणिनितपोभूमिनाम्ना प्रसिद्धः। इदानीन्तना जनास्तस्याद्रेर्नाम तदपभ्रंशरूपेण पणेना इति व्यवहरन्ति।

तत्र पर्वतशिखरे पाणिनिः सनकादयश्च चिरकालं तपश्चक्रुः। तेषां तपसा तुष्टो भगवान् शंकरस्तान् यथेष्टं वरं दातुं तत्राविर्बभूव। पाणिनिसहितान् सनाकादिसिद्धानुद्धर्तुकामो भगवान् महेश्वरस्तेषामग्रे डमरुं वादयन् ननर्त। ते च डमरुध्वनिमाकर्ण्य नयनान्युद्घाट्य भगवतो दर्शनं लेभिरे। भगवतः डमरुध्वनेर्निःसृतं अइउण् इत्यादि चतुर्दशशिवसूत्रजालमालोड्य सनकादयो ब्रह्मविद्यामवापुः, पाणिनिस्तमेव वर्णसमाम्नायमवाप्य तमाधारीकृत्य सूत्रात्मकं व्याकरणशास्त्रं रचयामास।

उक्तं च –

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ (पाणिनिः १९८९,२७)।

अतिसूक्ष्मविचारप्रधानस्य वर्णव्यवस्थाबद्धमूलस्य पाणिनीयव्याकरणस्य निर्माणप्रक्रमे शिवसूत्राणि बीजरूपाणि बभूवुः। दिव्यशक्तिमवाप्य पाणिनिरभूतपूर्वं प्रत्याहारप्रधानं सूत्रात्मकं व्याकरणशास्त्रं निर्ममे। यमालोक्य विश्वस्य मनीषा त्राटकीभवति। वेदस्य त्रीण्यङ्गानि यस्मिन् व्याकरणे सम्मिलितानि सन्ति, निरुक्तं, शिक्षा,व्याकरणञ्चेति। निरुक्तं श्रोत्रमुच्यते (पा.शिक्षा.४१) इति वर्णागमवर्णविपर्ययादिरूपनिरुक्तस्यापि पाणिनीयव्याकरणे अन्तर्भाव अस्ति।

वर्णोत्पत्तिस्थानविवेचनप्रक्रमे अकुहविसर्जनीयाः कण्ठ्याः। लृतुलसा दन्त्याः। लृवर्णस्य दीर्घा न सन्ति। सन्ध्यक्षराणां ह्रस्वा न सन्ति इत्यादि शिक्षावचनानि पाणिनीयव्याकरणे अन्तर्भूतत्वात् शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् (पाणिनीयशिक्षा.४२) इति वेदपुरुषस्य त्रीण्यङ्गानि पाणिनीयव्याकरणे सन्निहितानि विद्यन्ते। वर्णानां कण्ठताल्वाद्युत्पत्तिस्थानं तेषामुच्चाधोमध्यभागाद्यवयवेषु उच्चरितवर्णानां आभ्यन्तरबाह्यादि भेदपूर्वकविवेचनं पाणिनीयव्याकरणस्य सूक्ष्मविषयः, एतद्वैशिष्ट्यमन्यत्र क्वापि न दृश्यते।

न केवलं मानवानामुच्चारणध्वनेर्मीमांसा एव पाणिनीयव्याकरणे विहिताऽपितु मानवेतराणां पशुपक्षीणामप्युच्चारणं ध्वनिगतं सौक्ष्म्यं पाणिनिना विविक्तम्-

चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम्॥ (पाणिनिः १९८९,२३)।

चाषनामकः पक्षी एकमात्रोच्चारणे प्रसिद्धः, द्विमात्रोच्चारणे वायसः प्रसिद्धः, त्रिमात्रोच्चारणे शिखी

(कुक्कुटः) प्रसिद्धः, अर्धमात्रोच्चारणे नकुलः प्रसिद्ध इति विवेकः।

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते।

त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम्॥ (याज्ञवल्क्यः २०७०, ३०)।

सकलप्राणिनां व्यक्ताव्यक्तध्वन्युच्चारणगतसूक्ष्मतमध्वनिविदा अलौकिकदृष्टिमता पाणिनिना व्याकरणशास्त्रे ह्रस्वदीर्घप्लुतादिस्वराणामुच्चारणकालनिर्धारणं कुक्कुटरुतध्वनेर्विहितम् । तत्प्रमाणं च–'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' (पा. सू.१/२/२७) इति।

**स्वरवर्णवर्गीकरणम्-**

| ह्रस्वस्वराः | दीर्घस्वराः | प्लुतस्वराः |
|---|---|---|
| अ इ उ ऋ लृ | आ ई ऊ ॠ ए ओ ऐ औ | अ३ आ३ इ३ ई३ उ३ ऊ३<br><br>ऋ३ ॠ३ लृ३ए३ ऐ३ ओ३ औ३ |

**व्यञ्जनवर्णवर्गीकरणम्-**

ह् य् व् र् ल् ञ् म् ङ् ण् न् झ् भ् घ् ढ् ध् ज् ब् ग् ड् द् ख् फ् छ् ठ् थ् च् ट् त् क् प् श् ष् स् ह्

**वर्णानामुच्चारणस्थानविवेचनम् -**

पाणिनीयव्याकरणे प्रदर्शितं वर्णानामुच्चारणस्थानविवेचनमित्थं वर्तते -

कण्ठस्थानम्- (अकुहविसर्जनीयानां कण्ठः) अ, आ, क्, ख्, ग्, घ्, ङ्, ह्, अः एते वर्णाः कण्ठस्थानत उच्चार्यन्ते। अत एव एषां कण्ठस्थानमुच्यते।

तालुस्थानम्- (इचुयशानां तालु ) इ, ई, च्, छ्, ज्, झ, ञ्, य्, श् एते वर्णाः तालुस्थानत उच्चार्यन्ते। अत एव एषां तालुस्थानमुच्यते।

मूर्धास्थानम्- (ऋटुरषाणां मूर्धा) ऋ, ट्, ठ्, ड्, ढ्, ण्, र्, ष् एते वर्णा मूर्धास्थानत उच्चार्यन्ते। अत एव एषां मूर्धास्थानमुच्यते ।

दन्तस्थानम्- (लृतुलसानां दन्ताः) लृ, त्, थ्, द्, ध्, न्, ल्, स् एते वर्णा दन्तस्थानत उच्चार्यन्ते। अत एषां दन्तस्थानमुच्यते।

ओष्ठस्थानम्- (उपूपध्मानीयानामोष्ठौ) उ, ऊ, प्, फ्, ब्, भ्, म्, उपध्मानीयविसर्गः एते वर्णा ओष्ठस्थानत उच्चार्यन्ते। अत एव एतेषामोष्ठस्थानमुच्यते ।

नासिकास्थानम्- (ञमङणनानां नासिका च) ञ्, म्, ङ्, ण्, न् एते वर्णाः मुखसहितनासिकया उच्चार्यन्ते। अत एषां स्वस्ववर्गीयस्थानेन सह नासिकास्थानं च भवति।

कण्ठतालुस्थानम्- (एदैतोः कण्ठतालु) ए, ऐ, एतौ संयुक्तौ वर्णौ कण्ठतालुस्थानयोः साहाय्येनोच्चार्येते, अत एव एतयोः कण्ठतालुस्थानं भवति।

कण्ठोष्ठस्थानम्- (ओदौतोः कण्ठोष्ठम्) ओ, औ एतौ संयुक्तौ वर्णौ कण्ठोष्ठस्थानयोः साहाय्येनोच्चार्येते। अत

एतयोः कण्ठोष्ठस्थानं भवति।

दन्तोष्ठस्थानम्- (वकारस्य दन्तोष्ठम्) वकारस्योच्चारणं दन्तोष्ठयोः साहाय्येन भवति। अत एवास्य दन्तोष्ठस्थानं भवति।

जिह्वामूलस्थानम्- (जिह्वामूलीयस्य जिह्वामूलम्) जिह्वामूलीयविसर्गस्योच्चारणं जिह्वामूलतो भवति, अतस्तस्य जिह्वामूलस्थानं भवति। लोके तु तस्य प्रयोगो न भवति।

नासिकास्थानम्- (नासिकाऽनुस्वारस्य) अनुस्वारस्योच्चारणं नासिकातो भवति। अतस्तस्य नासिकास्थानम्। यो वर्णः यस्मात् शरीरावयवस्थानादुच्चार्यते तत्तस्यस्थानमिति विवेकः।

**वर्णानामुच्चारणप्रयत्नविवेचनम् -**

येन प्रयत्नेन यो वर्ण उच्चार्यते तस्य तादृश एव प्रयत्नो भवति। वर्णोच्चारणप्रयत्नविषये आभ्यन्तरबाह्यभेदेन द्विविधौ प्रयत्नौ भवतः।

**आभ्यन्तरप्रयत्नविवेचनम् -**

स्पृष्टः प्रयत्नः- (स्पृष्टं प्रयत्नं स्पर्शानाम्, कादयो मावसानाः स्पर्शाः) क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म् एषां वर्णानां स्पृष्टः प्रयत्नो भवति।

ईषत्पृष्टः प्रयत्नः- (ईषत्पृष्टमन्तः स्थानाम्, यणोऽन्तस्थाः) य् व्, र्, ल्, एषां वर्णानामीषत्स्पृष्टः प्रयत्नो भवति।

ईषद्विवृतः प्रयत्नः- (ईषद्विवृतमूष्मणाम्, शल ऊष्माणः) श्, ष्, स्, ह्, एषां वर्णानामीषद्विवृतः प्रयत्नो भवति।

विवृतः प्रयत्नः- (विवृतं स्वराणाम्, अचः स्वराः) अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ एषां वर्णानां विवृतः प्रयत्नो भवति।

**बाह्यप्रयत्नविवेचनम्-**

क्, च्, ट्, त्, प् एते वर्णाः विवाराः श्वासाः अघोषाः अल्पप्राणप्रयत्नवन्तः।

ख्, छ्, ठ्, थ्, फ्,श्, ष्, स्, एते वर्णाः विवाराः श्वासाः अघोषाः महाप्राणप्रयत्नवन्तः।

ग्, ज्, ड्, द्, ब्, ङ्, ञ्, ण्, न्, म्, य्, व्, र्, ल् एते वर्णाः संवाराः नादाः घोषाः,अल्पप्राणप्रयत्नवन्तः।

घ्, झ्, ढ्, ध्, भ्, ह् एते वर्णाः संवाराः नादाः घोषाः महाप्राणप्रयत्नवन्तः।

अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ एते वर्णाः संवाराः नादाः घोषाः अल्पप्राणप्रयत्नवन्तः, उदात्तोऽनुदात्तः स्वरितश्चेति।

इत्थं वर्णानां सूक्ष्मतमं स्थानप्रयत्नविवेचनं पाणिनीयव्याकरणादन्यत्र क्वापि न लभ्यते।

**सुबन्तपदनिष्पादनविधिः-**

सुप्तिङन्तं पदम् इति पाणिनीयसूत्रानुसारं सुबन्ततिङन्तभेदेन पदद्वैविध्यं सिद्धम्।

सुबन्तपदनिर्माणविधौ रामादिशब्देभ्य एकद्विबहुवचनेषु कर्तृकर्मकरणादिविवक्षानुसारेण "स्वौजसमौट्...." इत्यादिसूत्रेण कारकविधायकसूत्रसहयोगेन तास्ताः विभक्तयस्तानि तानि च कारकाणि विधीयन्ते। दिग्दर्शनं यथा–

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| कर्तरि=प्रथमा | सु=रामः | औ=रामौ | जस्=रामाः |

| | | | |
|---|---|---|---|
| कर्मणि=द्वितीया | अम्=रामम् | औट्=रामौ | शस्=रामान् |
| करणे=तृतीया | टा=रामेण | भ्याम्=रामाभ्याम् | भिस्=रामैः |
| सम्प्रदाने=चतुर्थी | | भ्याम्=रामाभ्याम् | भ्यस्=रामेभ्यः |
| अपादाने=पञ्चमी | ङे=रामाय | भ्याम्=रामाभ्याम् | भ्यस्=रामेभ्यः |
| सम्बन्धे=षष्ठी (कारकभिन्नविभक्तिः) | ङसि=रामात् | ओस्=रामयोः | आम्=रामाणाम् |
| अधिकरणे=सप्तमी | ङस्=रामस्य | ओस्=रामयोः | सुप्=रामेषु |

सम्बोधने प्रथमा विभक्तिर्भवति – हे राम, हे रामौ, हे रामाः इत्यादि।

उपर्युक्तानुसारेण सर्वेभ्यः प्रातिपदिकशब्देभ्यः कारकवचनादिविवक्षानुसारेण विभक्तयो विधीयन्ते।

**क्रियापदनिष्पादनविधिः-**

धातुगणपठितेभ्यो भू-आदिशब्देभ्यो लडादिप्रत्ययान् विधाय क्रियापदानि निर्मीयन्ते।

| प्रकृतिः | प्रत्ययः | निष्पन्नः शब्दः |
|---|---|---|
| धातुः=भू | ल्+अ+ति=अति | भवति (कर्तृवाच्ये) |
| धातुः=पच् | ल्+अ+ति=अति | पचति (कर्तृवाच्ये) |
| धातुः=भू | ल्+य+ते= | भूयते (भाववाच्ये) |
| धातुः=पच् | ल्+य+ते= | पच्यते (कर्मवाच्ये) |

व्याकरणानुसारं क्रियापदानां निष्पादनमनयैव पद्धत्या विधीयते। इत्थं धातुप्रकृतिभ्यः प्रत्ययादयः सूत्रैरेव व्यवस्थितरूपेण विधाय असंख्येयानि क्रियापदानि व्याकरणशास्त्रात् निर्मीयन्ते।

**कृदन्तपदनिष्पादनविधिः-**

पाणिनीयधातुपाठे पठितेभ्यः सकलधातुभ्यः 'कृदतिङ्' (अ.सू.३।१।९३) इति सूत्रानुशासनेन प्रत्ययविधानेन कृदन्ताः शब्दा निष्पाद्यन्ते।

यथा-

| प्रकृतिः प्रत्ययः | निष्पन्नःशब्दः | प्रकृतिः | प्रत्ययः | निष्पन्नः शब्दः |
|---|---|---|---|---|
| कृ ण्वुल्– अकः | कारकः | गम् | क्तः | गतः |
| पच् ण्वुल्–अकः | पाचकः | पच् | क्तः | पक्वम् |
| कृ क्तिन् | कृतिः | भू | इष्णुच् | भविष्णुः ,इत्यादि |

अनेन विधिना धातुगणपठितेभ्यः ण्यन्तसन्नन्तयङन्तयङ्लुगन्तनामधातुभ्यश्च सहस्रशः प्रत्ययविधानेन अनन्ताः कृदन्तशब्दाः निष्पाद्यन्ते।

**तद्धितान्तपदनिष्पादनविधिः-**

सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तेन नामशब्देभ्यः प्रातिपदिकेभ्यश्च अनेकेष्वर्थेषु तद्धितसंज्ञकाः प्रत्ययाः विधीयन्ते। तेन तद्धितान्ताः शब्दाः निष्पाद्यन्ते। यथा-

| प्रकृतिः | विग्रहः+अर्थः | प्रत्ययः | निष्पन्नः शब्दः |
|---|---|---|---|

| | | | |
|---|---|---|---|
| राष्ट्र | राष्ट्रे भवः | घ–इय् | राष्ट्रियः |
| उपगु | उपगोरपत्यम् | अण् | औपगवः |
| दक्ष | दक्षस्यापत्यम् | इञ् | दाक्षिः |
| व्याकरण | व्याकरणं अधीते वेत्ति वा | अण् | वैयाकरणः,इत्यादि |

इत्थं अनन्तशब्देभ्योऽनेकेष्वर्थेषु प्रत्ययान् विधाय तद्धितसंज्ञकाः शब्दा निष्पाद्यन्ते।

**समासप्रक्रियया पदनिष्पादनविधिः**- स्वतन्त्रार्थवाचकानामनेकपदानां एकपदीभवनं समासः इत्युच्यते। यथा-

| विग्रहः | समस्तशब्दः | विग्रहः | समास्तशब्दः |
|---|---|---|---|
| हरौ इति | अधिहरि | शक्तिमनतिक्रम्य | यथाशक्ति |
| राज्ञः पुरुषः | राजपुरुषः | शङ्कुलया खण्डः | शङ्कुलाखण्डः |
| कृष्णं श्रितः | कृष्णश्रितः | पीतं अम्बरं यस्य सः | पीताम्बरः |
| हरिणा त्रातः | हरित्रातः | चित्रा गौर्यस्य सः | चित्रगुः |
| कुत्सितःपुरुषः | कुपुरुषः | अन्यद् वनं | वनान्तरम् ,इत्यादि |

**सन्धिप्रक्रियया पदनिष्पादनविधिः**-

स्वरव्यञ्जनवर्णानां स्थाने सन्धिप्रक्रियया आदेशविधानं, दीर्घपूर्वरूपपररूपादिना द्वयोरेकीभवनं, वर्णपरिवर्तनं आगमविधानं, वर्णानां लोपाद्यनेककार्यैः बहुविधाः शब्दा निष्पाद्यन्ते। यथा-

| विग्रहः | सन्धिः | रूपम् | विग्रहः | सन्धिः | रूपम् |
|---|---|---|---|---|---|
| सुधी+उपास्यः | यण् | सुद्ध्युपास्यः | हरिस्+शेते | श्चुत्वम् | हरिश्शेते |
| रमा+ईशः | गुणः | रमेशः | तत्+टीका | ष्टुत्वम् | तट्टीका |
| हरे+ए | अय् | हरये | वाक्+हरिः | पूर्वसवर्णम् | वाग्घरिः |
| मनस्+रथः | रुत्वोत्वे | मनोरथः | | सत्वे | नमस्करोति |

इत्थं संक्षेपतः पदनिष्पादनप्रक्रियां निर्दिश्य वाक्यनिर्माणप्रक्रिया उच्यते।

**कारकविवेचनम्** ( वाक्यनिर्माणप्रक्रियायाम् )

करोति क्रियां निर्वर्तयति इति भाष्ये व्युत्पत्तिदर्शनात्। क्रियाजनकत्वं कारकत्वम् , क्रियान्वयित्वं कारकत्वम्। कारकाणि च षट् भवन्ति -

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानाधिकरणे चेत्याहुः कारकाणि षट्॥ (भट्टः १९९१, २५२)

१. कर्ता २. कर्म, ३.करणम्, ४. सम्प्रदानम्, ५. अपादानम् ६. अधिकरणम् इति षट् कारकाणि भवन्ति।

कर्ता- क्रियासम्पादने यः स्वतन्त्रो भवति स कर्ता इत्युच्यते। 'स्वतन्त्रः कर्ता' (अ.सू.१।४।५४)

यथा- रामः ओदनं पचति इत्यस्मिन् वाक्ये पाकक्रियायां रामः स्वतन्त्रोऽस्ति, तेन विना क्रिया न सम्पद्यते, यस्याधीनं सर्वं वाक्यं भवति। अतस्तस्य प्राधान्यमस्ति। स एव कर्तृकारकत्वेन उच्यते।

कर्तृवाच्ये कर्तरि प्रथमा अन्यत्र तृतीया इति सिद्धान्तः।

कर्म- कर्तुः क्रियया आप्तुमिष्टतमं कारकमेव कर्म इत्युच्यते। 'कर्तुरीप्सिततमं कर्म'(अ.सू.१।४।४९¬)

रामः ओदनं पचति, अस्मिन् वाक्ये ओदनं कर्म। रामस्य पाकक्रियाद्वारा आप्तुं इष्टतमं वस्तु ओदनमेव। अतस्तस्य कर्मत्वं सिद्ध्यति। कर्तृवाच्यस्य कर्मणि द्वितीया विभक्तिर्भवति। 'कर्मणि द्वितीया'(अ.सू.२।३।२)

करणम्- क्रियासम्पादनार्थं अत्यन्तसहयोगित्वेन विद्यमानं (वस्तु) कारकं करणम्।

'साधकतमं करणम्'(अ.सू.१।१।४२)

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्षते यदा यत्र करणं तत्तदा स्मृतम्। ( भर्तृहरिः)

रामः बाणेन बालिनं जघान, इत्यस्मिन् वाक्ये स्थितं बाणपदं हननक्रियायामतिशयसहयोगिवस्तुवाचकम्। बाणं विना हननक्रिया भवितुं न शक्नोति। अत एव अत्र बाणपदं करणकारकम्। 'कर्तृकरणयोस्तृतीया'(अ.सू. २।३।३२) इति सूत्रेण करणसंज्ञकशब्दात् तृतीया विभक्तिर्भवति।

सम्प्रदानम्- क्रियायाः कर्मणा कर्ता यं सम्बन्धुमीप्सति तत्कारकं सम्प्रदानसंज्ञकमित्यर्थः । 'कर्मणा यमभिप्रैति स सम्प्रदानम्' (अ.सू.१।४।३२)इति सम्प्रदानसंज्ञा भवति।

विप्राय गां ददाति इत्यत्र देवदत्तः कर्ता गां कर्म दानक्रियया विप्रं सम्बन्धुमिच्छति। विप्रो दानक्रियाया उद्देश्यः,अतप्र स्तस्य सम्प्रदानत्वं सिद्ध्यति। 'चतुर्थी सम्प्रदाने' (अ.स.२।३।१३) इति सूत्रेण सम्प्रदानकारके चतुर्थीविभक्तिर्भवति।

अपादानम्- विश्लेषक्रियाया अवधिरेव अपादानमुच्यते। 'ध्रुवमपायेऽपादानम्' (अ.सू.१।४।२४) वृक्षात् पर्णं पतति इति वाक्ये वृक्षो विश्लेषस्यावधिः, अतस्तस्यापादानसंज्ञा। 'अपादाने पञ्चमी' (अ.सू. २।३।२८) इति अपादान-संज्ञकात् पञ्चमीविभक्तिर्भवति।

अधिकरणम्- कर्तृनिष्ठक्रियायाः कर्मनिष्ठक्रियायाश्च माध्यमेन यः कर्तुः कर्मणश्च आधारो भवति सः अधिकरणसंज्ञक इत्युच्यते। 'आधारोऽधिकरणम्' (अ.सू.१।४।४५) इत्यधिकरणसंज्ञा। आधारश्च त्रिधा भवति- १. औपश्लेषिकः, २. वैषयिकः, ३. अभिव्यापकश्च इति।

औपश्लेषिक आधारः- उपश्लेषः संयोगादिसम्बन्धस्तत्प्रयोज्य आधारः। यथा- कटे आस्ते इत्यत्र कर्तृद्वारकमौपश्ले षिकमधिकरणम्। स्थाल्यां पचति इत्यत्र कर्मद्वारकमौपश्लेषिकमधिकरणम्।

वैषयिक आधारः- विषयतासम्बन्धकृतः आधारः। यथा- मोक्षे इच्छास्ति इत्यत्र मोक्षविषयिणी इच्छास्ति इत्यर्थः।

अभिव्यापक आधारः सकलावयवव्याप्तिकृत आधारः । यथा- सर्वस्मिन् आत्मा अस्ति, तिलेषु तैलमित्यादि । 'सप्तम्यधिकरणे च' (अ.सू.२।३।३६) इति सूत्रेण अधिकरणसंज्ञकेभ्यः सप्तमीविभक्तिर्भवति।

इत्थं शब्दानां बाह्यकलेवरं विविच्य शब्दानामात्मभूताया वाण्यास्तत्त्वविवेचनं पाणिनीयव्याकरणस्य दार्शनिको विवेच्यविषय इति ज्ञायते।

**चतुर्विधवाक्तत्त्वविवेचनम्**

लेख्यं दृश्यमानमुच्चार्यमाणं वा भाषाया बाह्यं शरीरं वर्णपदवाक्यावयवसम्वद्धं भवति। तस्या आन्तरिकं आत्मतत्वं वाक्त्वमित्यभिधीयते। वाण्याः स्वरूपं चतुर्धा विभक्तमस्ति। १.परा, २.पश्यन्ती, ३.मध्यमा, ४.वैखरी इति।

'परावाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥' (भट्टः १९९१, ९४)।

'वैखर्या हि कृतो नादः परश्रवणगोचरः।

मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।'(भट्टः १९९१, ९४)।

परावाक्- मूलाधारे स्थिता अतिशयसूक्ष्मा शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परावागुच्यते।'

पश्यन्तीवाक्- नाभिप्रदेशे विद्यमाना सूक्ष्मत्वेन मनोमात्रविषया पश्यन्ती वागुच्यते।

मध्यमावाक्- हृत्प्रदेशे स्थिता परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा स्वबुद्धिविषया मध्यमा वागुच्यते।

वैखरीवाक्- कण्ठताल्वादिस्थानत उच्चार्यमाणा परश्रवणयोग्या लौकिकव्यवहारविषया वैखरी वाणी इत्युच्यते। वैखरी कण्ठदेशगा इति। एतच्च पाणिनीयव्याकरणाध्ययनं विना ज्ञातुं न शक्यते। एतेन जगतीतले विद्यमानेषु सकलव्याकरणेषु पाणिनीयव्याकरणस्य सर्वोच्चं वैशिष्ट्यं द्योत्यते।

## निष्कर्षः

व्याकरणस्य विषयविवेचनप्रसंगे वर्णानां उच्चारणस्थानप्रयत्नादिसूक्ष्मतत्त्वविवेचनपूर्वकं प्रकृतिप्रत्ययार्थविवेचनसहितं पदनिष्पादनं कारकादिविवेचनेन वाक्यनिर्माणविधेर्बोधनं च व्याकरणादितरत्र क्वापि न लभ्यते। सर्वेषां दृश्यपदार्थानां बोधकाः वाचका वा शब्दाः शब्दब्रह्मणो बाह्यं कलेवरमात्रम्। तेषामात्मस्वरूपं स्फोटात्मकं शब्दब्रह्म अर्थरूपेण बोध्यमर्थस्वरूपं ब्रह्म च सूक्ष्मतमम्। पाणिनीयव्याकरणे वाक्तत्त्वस्य बाह्याभ्यन्तररूपयोरुभयोर्विवेचनं च सर्वोत्कृष्टतमं दृश्यते। संस्कृतभाषायाः सर्वाङ्गीणपक्षस्य सूक्ष्मविवेचनं पाणिनीयव्याकरणस्य विवेच्यविषय इति निष्कर्षोऽत्र प्रस्तूयते।

## कृतज्ञताज्ञापनम्

प्रस्तुतेऽस्मिन्नालेखे शब्दसाधुत्वप्रतिपादकस्य व्याकरणशास्त्रस्य विषयविवेचनक्रमे अनुसन्धानात्मकाऽऽलेख-गतप्रविध्यादिविषये च परामर्शदातृभ्यो विद्वद्भ्यो धन्यवादं प्रस्तौमि। तथा चालेखमिदत् माद्यन्तं सम्परीक्ष्य परामर्शदातृभ्यो विज्ञेभ्योऽपि हार्दिकीं कृतज्ञतां व्यनज्मि।

## सन्दर्भग्रन्थसूची

त्रिपाठीः,ब्रह्मदत्तः(१९८४) प्रबन्धसंग्रहः, वाराणसीः चौखम्बासुरभारतीप्रकाशनम्।

पाणिनिः(१९८९).पाणिनीयशिक्षा(व्या.डा.रमाशंकरमिश्रः) वाराणसीःचौखम्वा सुरभारती प्रकाशनम्।

पाण्डेयः गोपालदत्तः,प्रल्हादगिरिः(१९८१).अष्टाध्यायी, वाराणसीःचौखम्वा सुरभारती प्रकाशनम्।

भट्टः नागेशः,(१९९१).परमलघुमञ्जूषा, वाराणसीः चौखम्वा सुरभारती प्रकाशनम्।

भर्तृहरिः(१९८७). वाक्यपदीयम्,(सं.सत्यनारायण खण्डूडी) वाराणसीः कृष्णदास अकादमी।

याज्ञवल्क्यः(२०७०).याज्ञवल्क्यशिक्षा,(सम्पा.डा.दिव्यचेतनब्रह्मचारी, गोविन्दपौडेलः), वाराणसी : चौखम्बा संस्कृत पुस्तकालयः।